वसुदेवसुतं देवं, कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं, कृष्णं वन्दे जगद्गुरुम् ॥१॥
मूकं करोति वाचालं, पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे, परमानन्दमाधवम् ॥२॥

धृतराष्ट्र उवाच –
धर्मक्षेत्रे कुरुक्षेत्रे, समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव, किम् अकुर्वत संजय ॥१.०१॥
संजय उवाच –
तं तथा कृपयाविष्टम् , अश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तम् इदं वाक्यम् , उवाच मधुसूदनः ॥२.०१॥
श्रीभगवानुवाच –
अशोच्यान् अन्वशोचस् त्वं, प्रज्ञावादांश्च भाषसे ।
गतासून् अगतासूंश्च, नानुशोचन्ति पण्डिताः ॥२.११॥
देहिनोऽस्मिन् यथा देहे, कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर् , धीरस् तत्र न मुह्यति ॥२.१३॥
वासांसि जीर्णानि यथा विहाय,
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्य् ,
अन्यानि संयाति नवानि देही ॥२.२२॥
सुखदुखे समे कृत्वा, लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व, नैवं पापम् अवाप्स्यसि ॥२.३८॥
कर्मण्येवाधिकारस्ते, मा फलेषु कदाचन ।
मा कर्मफलहेतुर् भूर् , मा ते सङ्गोऽस्त्व् अकर्मणि ॥२.४७॥
बुद्धियुक्तो जहातीह, उभे सुकृतदुष्कृते ।
तस्माद् योगाय युज्यस्व, योगः कर्मसु कौशलम् ॥२.५०॥
इन्द्रियाणां हि चरतां, यन् मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां, वायुर् नावम् इवाम्भसि ॥२.६७॥
प्रकृतेः क्रियमाणानि, गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा, कर्ताहम् इति मन्यते ॥३.२७॥
एवं बुद्धेः परं बुद्ध्वा, संस्तभ्यात्मानम् आत्मना ।
जहि शत्रुं महाबाहो, कामरूपं दुरासदम् ॥३.४३॥
यदा यदा हि धर्मस्य, ग्लानिर् भवति भारत ।
अभ्युत्थानम् अधर्मस्य, तदात्मानं सृजाम्यहम् ॥४.०७॥
चातुर्वर्ण्यं मया सृष्टं, गुणकर्मविभागशः ।
तस्य कर्तारम् अपि मां, विद्ध्य् अकर्तारम् अव्ययम् ॥४.१३॥
कर्मण्य् अकर्म यः पश्येद् , अकर्मणि च कर्म यः ।
स बुद्धिमान् मनुष्येषु , स युक्तः कृत्स्नकर्मकृत् ॥४.१८॥
ब्रह्मार्पणं ब्रह्म हविर् , ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं, ब्रह्मकर्मसमाधिना ॥४.२४॥
न हि ज्ञानेन सदृशं, पवित्रम् इह विद्यते ।
तत् स्वयं योगसंसिद्धः, कालेनात्मनि विन्दति ॥४.३८॥
संन्यासस् तु महाबाहो, दुखम् आप्तुम् अयोगतः ।
योगयुक्तो मुनिर् ब्रह्म, नचिरेणाधिगच्छति ॥५.०६॥
ब्रह्मण्य् आधाय कर्माणि, सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन, पद्मपत्रम् इवाम्भसा ॥५.१०॥
यो मां पश्यति सर्वत्र, सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि, स च मे न प्रणश्यति ॥६.३०॥
चतुर्विधा भजन्ते मां, जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुर् अर्थार्थी, ज्ञानी च भरतर्षभ ॥७.१६॥
बहूनां जन्मनाम् अन्ते, ज्ञानवान् मां प्रपद्यते ।
वासुदेवः सर्वम् इति, स महात्मा सुदुर्लभः ॥७.१९॥
अव्यक्तं व्यक्तिम् आपन्नं, मन्यन्ते माम् अबुद्धयः ।
परं भावम् अजानन्तो, ममाव्ययम् अनुत्तमम् ॥७.२४॥
यं यं वापि स्मरन् भावं, त्यजत्य् अन्ते कलेवरम् ।
तं तं एवैति कौन्तेय, सदा तद्भावभावितः ॥८.०६॥
तस्मात् सर्वेषु कालेषु , माम् अनुस्मर युध्य च ।
मय्य् अर्पितमनोबुद्धिर् , माम् एवैष्यस्य् असंशयम् ॥८.०७॥
अनन्याश् चिन्तयन्तो मां, ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां, योगक्षेमं वहाम्यहम् ॥९.२२॥
पत्रं पुष्पं फलं तोयं, यो मे भक्त्या प्रयच्छति ।
तद् अहं भक्त्युपहृतम् , अश्नामि प्रयतात्मनः ॥९.२६॥
मन्मना भव मद्भक्तो, मद्याजी मां नमस्कुरु ।
माम् एवैष्यसि युक्त्वैवम् , आत्मानं मत्परायणः ॥९.३४॥
अहं सर्वस्य प्रभवो, मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां, बुधा भावसमन्विताः ॥१०.०८॥
मत्कर्मकृन् मत्परमो, मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु , यः स माम् एति पाण्डव ॥११.५५॥
मय्येव मन आधत्स्व, मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव, अत ऊर्ध्वं न संशयः ॥१२.०८॥
समं सर्वेषु भूतेषु , तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्व् अविनश्यन्तं, यः पश्यति स पश्यति ॥१३.२७॥
मां च योऽव्यभिचारेण, भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् , ब्रह्मभूयाय कल्पते ॥१४.२६॥
सर्वस्य चाहं हृदि संनिविष्टो, मत्तः स्मृतिर् ज्ञानम् अपोहनं च ।
वेदैश्च सर्वैर् अहम् एव वेद्यो, वेदान्तकृद् वेदविद् एव चाहम् ॥
त्रिविधं नरकस्येदं , द्वारं नाशनम् आत्मनः ।
कामः क्रोधस् तथा लोभस् , तस्माद् एतत् त्रयं त्यजेत् ॥१६.२१॥
अनुद्वेगकरं वाक्यं, सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव, वाङ्मयं तप उच्यते ॥१७.१५॥
भक्त्या माम् अभिजानाति, यावान् यश् चास्मि तत्त्वतः ।
ततो माम् तत्त्वतो ज्ञात्वा , विशते तदनन्तरम् ॥१८.५५॥
ईश्वरः सर्वभूतानां, हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि, यन्त्रारूढानि मायया ॥१८.६१॥
सर्वधर्मान् परित्यज्य, मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो, मोक्षयिष्यामि मा शुचः ॥१८.६६॥
य इमं परमं गुह्यं, मद्भक्तेष्व् अभिधास्यति ।
भक्तिं मयि परां कृत्वा, माम् एवैष्यत्य् असंशयः ॥१८.६८॥
न च तस्मान् मनुष्येषु कश्चिन् मे प्रियकृत्तमः ।
भविता न च मे तस्माद् अन्यः प्रियतरो भुवि ॥६९॥
संजय उवाच –
यत्र योगेश्वरः कृष्णो, यत्र पार्थो धनुर्धरः ।
तत्र श्रीर् विजयो भूतिर् , ध्रुवा नीतिर् मतिर् मम ॥१८.७८॥

ॐ तत्सत्

Download from:
www.gita-society.com/gitachalisa-SH.pdf